# ॥ બકગીતા ॥

.. bakagItA ..

sanskritdocuments.org

August 20, 2017

# .. bakagItA ..

# ॥ બકગીતા ॥

## Sanskrit Document Information

Text title : bakagItA evam baka shakra saMvAda

File name : bakagiitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Sunder Hattangadi sunder at hotmail.com

Proofread by : Sunder Hattangadi sunder at hotmail.com

Description-comments : Ch. 193 of Vana Parva, Mahabharata, in Kinjavadekar edition.

Latest update : February 10, 2013

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ બકગીતા ॥

॥ અથ બકગીતા ॥

વૈશમ્પાયન ઉવાચ -
માર્કણ્ડેયમૃષયો બ્રાહ્મણા યુધિષ્ઠિરશ્ચ પર્યપૃચ્છન્નૃષિઃ ।
કેન દીર્ઘાયુરાસીદ્બકો માર્કણ્ડેયસ્તુ તાન્સર્વાનુવાચ ॥ ૧॥

મહાતપા દીર્ઘાયુશ્ચ બકો રાજર્ષિર્નાત્રકાર્યા વિચારણા ॥ ૨॥

એતચ્છ્રુત્વા તુ કૌન્તેયો ભ્રાતૃભિઃ સહ ભારત ।
માર્કણ્ડેયં પર્યપૃચ્છદ્ધર્મરાજો યુધિષ્ઠિરઃ ॥ ૩॥

બકદાલ્ભ્યૌ મહાત્માનૌ શ્રૂયેતે ચિરજીવિનૌ ।
સખાયૌ દેવરાજસ્ય તાવૃષી લોકસંમિતૌ ॥ ૪॥

એતદિચ્છામિ ભગવન્ બકશક્રસમાગમમ્ ।
સુખદુઃખસમાયુક્તં તત્ત્વેન કથયસ્વ મે ॥ ૫॥

માર્કણ્ડેય ઉવાચ -
વૃત્તે દેવાસુરે રાજન્સંગ્રામે લોમહર્ષણે ।
ત્રયાણામપિ લોકાનામિન્દ્રો લોકાધિપો ભવત્ ॥ ૬॥

સમ્યગ્વર્ષતિ પર્જન્યે સુખસમ્પદ ઉત્તમાઃ ।
નિરામયાસ્તુ ધર્મિષ્ઠાઃ પ્રજા ધર્મપરાયણાઃ ॥ ૭॥

મુદિતશ્ચ જનઃ સર્વઃ સ્વધર્મે સુવ્યવસ્થિતઃ ।
તાઃ પ્રજા મુદિતાઃ સર્વા દૃષ્ટાબલનિષૂદનઃ ॥ ૮॥

તતસ્તુ મુદિતો રાજન્ દેવરાજઃ શતક્રતુઃ ।
ઐરાવતં સમાસ્થાય તાઃ પશ્યન્મુદિતાઃ પ્રજાઃ ॥ ૯॥

આશ્રમાંશ્ચ વિચિત્રાંશ્ચ નદીશ્ચ વિવિધાઃ શુભાઃ ।
નગરાણિ સમૃદ્ધાનિ ખેટાઞ્જનપદાંસ્તથા ॥ ૧૦॥

પ્રજાપાલનદક્ષાંશ્ચ નરેન્દ્રાન્ધર્મચારિણઃ ।
ઉદપાનપ્રપાવાપીતડાગાનિસરાંસિચ ॥ ૧૧॥

નાનાબ્રહ્મસમાચારૈઃ સેવિતાનિ દ્વિજોત્તમૈઃ ।

તતોવતીર્ય રમ્યાયાં પૃથ્વ્યાં રાજગ્છતક્રતુઃ ॥ ૧૨॥

તત્ર રમ્યે શિવે દેશે બહુવૃક્ષસમાકુલે ।
પૂર્વસ્યાં દિશિ રમ્યાયાં સમુદ્રાભ્યાશતો નૃપ ॥ ૧૩॥

તત્રાશ્રમપદં રમ્યં મૃગદ્વિજનિષેવિતમ્ ।
તત્રાશ્રમપદે રમ્યે બકં પશ્યતિ દેવરાટ્ ॥ ૧૪॥

બકસ્તુ દૃષ્ટ્વા દેવેન્દ્રં દૃઢં પ્રીતમનાભવત્ ।
પાદ્યાસનાર્ઘદાનેન ફલમૂલૈરથાર્ચયત્  ॥ ૧૫॥

સુખોપવિષ્ટો વરદસ્તતસ્તુ બલસૂદનઃ ।
તતઃ પ્રશ્નં બકં દેવ ઉવાચ-ત્રિદશેશ્વરઃ॥ ૧૬॥

શતં વર્ષસહસ્રાણિ મુને જાતસ્ય તેનઘ ।
સમાખ્યાહિ મમ બ્રહ્મન્ કિં દુઃખં ચિરજીવિનામ્ ॥ ૧૭॥

બક ઉવાચ -
અપ્રિયૈઃ સહ સંવાસઃ પ્રિયૈશ્ચાપિ વિનાભવઃ ।
અસદ્ભિઃ સમ્પ્રયોગશ્ચ તદ્દુઃખં ચિર્જીવિનામ્ ॥ ૧૮॥

પુત્રદારવિનાશોત્ર જ્ઞાતીનાં સુહૃદામપિ ।
પરેષ્વાપતતે કૃછ્રં કિંનુ દુઃખતરં તતઃ ॥ ૧૯॥

નાન્યદ્દુઃખતરં કિંચિલ્લોકેષુ પ્રતિભાતિ મે ।
અર્થૈર્વિહીનઃ પુરુષઃ પરૈઃ સમ્પરિભૂયતે ॥ ૨૦॥

અકુલાનાં કુલે ભાવં કુલીનાનાં કુલક્ષયમ્ ।
સંયોગં વિપ્રયોગં ચ પશ્યન્તિ ચિરજીવિનઃ ॥ ૨૧॥

અપિ પ્રત્યક્ષમેવૈતદ્દેવદેવ શતક્રતો ।
અકુલાનાં સમૃદ્ધાનાં કથં કુલવિપર્યયઃ ॥ ૨૨॥

દેવદાનવગન્ધર્વમનુષ્યોરગરાક્ષસાઃ ।
પ્રાપ્નુવન્તિ વિપર્યાસં કિંનુ દુઃખતરં તતઃ ॥ ૨૩॥

કુલે જાતાશ્ચ ક્લિશ્યન્તે દૌષ્કુલે યવશાનુગાઃ ।
આઢ્યૈર્દરિદ્રાવમતાઃ કિંનુ દુઃખતરં તતઃ ॥ ૨૪॥

લોકે વૈધર્મ્યમેતત્તુ દૃશ્યતે બહુવિસ્તરમ્ ।

હીનજ્ઞાનાશ્ચ દૃશ્યન્તે ક્લિશ્યન્તે પ્રાજ્ઞકોવિદાઃ ॥ ૨૫॥

બહુદુઃખપરિક્લેશં માનુષ્યમિહ દૃશ્યતે ।
ઇન્દ્ર ઉવાચ -
પુનરેવ મહાભાગ દેવર્ષિગણસેવિત ॥ ૨૬॥

સમાખ્યાહિ મમ બ્રહ્મન્ કિં સુખં ચિરજીવિનામ્ ।
બક ઉવાચ -
અષ્ટમે દ્વાદશે વાપિ શાકં યઃ પચતે ગૃહે ॥ ૨૭॥

કુમિત્રાણ્યનપાશ્રિત્ય કિં વૈ સુખતરં તતઃ ।
યત્રાહાનિ ન ગણ્યન્તે નૈનમાહુર્મહાશનમ્ ॥ ૨૮॥

અપિ શાકંપચાનસ્ય સુખં વૈ મઘવન્ ગૃહે ।
અર્જિતં સ્વેન વીર્યેણ નાપ્યપાશ્રિત્ય કઞ્ચન ॥ ૨૯॥

ફલશાકમપિ શ્રેયો ભોક્તું હ્યકૃપણે ગૃહે ।
પરસ્ય તુ ગૃહે ભોક્તુઃ પરિભૂતસ્ય નિત્યશઃ ॥ ૩૦॥

સુમૃષ્ટમપિ ને શ્રેયો વિકલ્પોયમતઃ સતામ્ ।
શ્વવત્કીલાલપો યસ્તુ પરાન્નં ભોક્તુમિચ્છતિ ॥ ૩૧॥

ધિગસ્તુ તસ્યતદ્ભુક્તં કૃપણસ્ય દુરાત્મનઃ ।
યો દત્ત્વાતિથિભૂતેભ્યઃ પિતૃભ્યશ્ચ દ્વિજોત્તમઃ ॥ ૩૨॥

શિષ્ટાન્યનાનિ યો ભુઙ્ક્તે કિંવૈ સુખતરં તતઃ ।
અતો મૃષ્ટતરં નાન્યત્પૂતં કિઞ્ચિચ્છતક્રતો ॥ ૩૩॥

દત્વા યસ્ત્વતિથિભ્યો વૈ ભુઙ્ક્તે તેનૈવ નિત્યશઃ ।
યાવતોહ્યંધસઃ પિણ્ડાનશ્નાતિ સતતં દ્વિજઃ ॥ ૩૪॥

તાવતાં ગોસહસ્રાણાં ફલં પ્રાપ્નોતિ દાયકઃ ।
યદેનો યૌવનકૃતં તત્સર્વ નશ્યતે ધ્રુવમ્ ॥ ૩૫॥

સદક્ષિણસ્ય ભુક્તસ્ય દ્વિજસ્ય તુ કરે ગતમ્ ।
યદ્વારિ વારિણા સિંચેત્તદ્ધ્યેનસ્તરતે ક્ષણાત્ ॥ ૩૬॥

એતશ્ચાન્યાશ્ચવૈ બહ્વીઃ કથયિત્વા કથાઃ શુભાઃ ।
બકેન સહ દેવેન્દ્ર આપૃચ્છ્ય ત્રિદિવં ગતઃ ॥ ૩૭॥

॥ ઇતિ બક શક્ર સંવાદ એવં બકગીતા સમાપ્તા ॥

Ch. 193 of Vana Parva, Mahabharata, in Kinjavadekar edition.

Encoded and proofread by Sunder Hattangadi sunder at hotmail.com

.. bakagItA ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*